XII - Sanskrit 24/01/24 XII

संस्कृतम्

द्वादशी कक्षा

गुणाः – ८० समय

: होरात्रयम्

कृतिपत्रिका

सूचनाः

(१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(२) यथासूचनम् आकलनकृतयः व्याकरणकृतयः च आरेखितव्याः।

(३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

(४) रिक्तस्थानपूरणे युज्यमानाः शब्दाः अधोरेखितव्याः।

प्रथमः विभागः – सुगमसंस्कृतम् ।

प्रथमः विभागः – सुगमसंस्कृतम् । (०६)

प्र.क्र. १ अ) चिन्हानाम् अर्थम् लिखत ।
(०३)

प्र.क्र १ आ व्यावहारिकशब्दमञ्जूषायाः शब्दान् चित्वा उचित स्तम्भे लिखित(०३)

क्रीडा	शिक्षणम्	कला

Sanskrit - II

(प्राच्यविद्या, हस्तलाघवम्, नृत्यनाट्यम्, यूपक्रीडा, अधिष्ठाता, लक्ष्यवेधम्, शुकसारिकाप्रलापनम्, ताल:)

द्वितीयः विभागः - पद्यम् ।

प्र.२ अ) **पद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत ।**

अवबोधनम् (३ तः २)

१. **उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

समुद्रः पीताम्बराय विष्णवे स्वकन्यां ददौ, यतः ....।

अ) पीताम्बरं विष्णोः धनसम्पन्नतां सूचयति।

ब) समुद्राय पीतवर्णः अतीव रोचते।

२. **उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

सद्भ्यः एषा न रोचते – [ ]

३. **पूर्णवाक्येन उत्तरं लिखत।**

प्रथमायाः सख्याः भर्ता कीदृशः?

अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम्।
सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते।।४।।

द्वन्द्वोऽहं द्विगुरप्यहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः ।।५।।

(आर्या)

चतुरः सखि मे भर्ता यल्लिखति तत्परो न वाचयति।
तस्माप्यधिको मे स्वयमपि लिखितं स्वयं न वाचयति।। ६।।

(आर्या)

वासः प्रधानं खलु योग्यताया वासोविहीनं विजहाति लक्ष्मीः
पीताम्बरं वीक्ष्य ददौ स्वकन्यां दिगम्बरं वीक्ष्य विषं समुद्रः ।।७।।

शब्दज्ञानम्। (३ तः २) (०२

१. सम्बोधनान्तविभक्तिपदे लिखत।

२. विरुद्धार्थकशब्दौ लिखत।

प्रधानम्, दुर्निवारम्

३. सन्धिविग्रहः कुरुत।

द्वन्दोऽहं - ________ + ________ ।

प्र.२ ब) १. पद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत । (०४

अवबोधनम् (३ तः २)

१. उचितं कारणं चित्वा वाक्यानि पुनर्लिखित।

यात्रिवर्गः नृसिंहवाटीम् आगच्छति, यतः ---------

अ) सः नरसिंहदर्शनम् इच्छति।

ब) सः अत्रिसूनोः दर्शनम् इच्छति।

२. वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

श्रावणमासे भक्तव्रजः पौण्डरीकं क्षेत्रं समागच्छति

३. उचितं शब्दं चित्वा चतुष्कोणं पूरयत।

तुळजापुरस्था - [ ]

भक्तव्रजस्तालमृदङ्गनादैर्गर्जन्मुहुर्विठ्ठल-विठ्ठलेति।
आषाढमासे प्रतिवर्षमत्र क्षेत्रं समागच्छति पौण्डरीकम्।।५।।

स्नातुं पवित्राम्भसि कृष्णवेण्या द्रष्टुं पदाब्जद्वयमत्रिसूनोः।
अजस्त्रमागच्छति दूरदूरन्नृसिंहवाटीमिह यात्रिवर्गः ।।६।।

श्रीत्र्यम्बकेशो घुसृणेश्वरो वा यत्र क्वचिद् क्षेत्रमहाबलेशः।
भीमाश्रयः शङ्करनामधेयः क्वचिच्छिवो राजति वैद्यनाथः ।।७।।

महालसाख्यां क्वचिदादधाति यत्र क्वचिद्विन्दति रेणुकाख्याम् ।
लक्ष्मीस्वरूपा क्वचितदादिशक्तिः क्वचिद भवानी तुळजापुरस्था ।।८।।

पृथक्करणम्

१. जालरेखाचित्रम् पूरयत। (८



प्र.२ क) १. पद्यांशस्य अन्वयपूर्तिं कुरुत / माध्यमभाषया सरलार्थं लिखित। (८

भो दारिद्र नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
पशाम्यहं जगत्सर्वं न मां पश्यति कश्चन ।।३।।
अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम्।
सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते।।

भो दारिद्र्य! ________ नमः । अहं __________ सिद्धः (जातः) । अहं सर्व __________ पश्यामि । कश्चन __________ न पश्यति।

स्तुतिकन्या __________ दुर्निवारं __________ वहति । सा __________ न रोचते अस्यै अपि __________ न रोचन्ते।

· तृतीयः विभागः – गद्यम् । (०९)

प्र.२ अ) गद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत । (०४

अवबोधनम् (३ तः २) (०२

उचितं वाक्यांशं चित्वां वाक्यं पुनर्लिखत।

१) सरस्वती भाषाः अवदत् – __________ ।

अ) भाषायाः शरीरं शब्दरूपम्, आत्मा अर्थरूपः।

ब) भाषायाः शरीरं अर्थरूपम्, आत्मा शब्दरूपः।

२) पूर्णवाक्येन उत्तरत चित्वा वाक्यं पुनर्लिखत।

के शक्तिस्वरूपाः?

३) वाक्यं पुनर्लिखित्वा सत्यं/ असत्यं लिखत।

समानार्थक-शब्दानां मूलार्थाः अपि चिन्तनीयाः

पूरा किल परस्परं विवदमाना: भारतीयभाषा: सर्वा: देवीं सरस्वतीं जग्मु:। सर्वा: तामूचु:, ''देवि, का नु अस्मासु श्रेष्ठा?'' तदा सरस्वती ता: उवाच, ''आसेतुहिमाचलम् भारते विराजमाना: यूयं सर्वा: भाषा: श्रेष्ठा:।'' सर्वा: अवदन्, ''कथमेतत् शक्यम्?'' तदा सरस्वती उवाच, ''भवतीषु प्रत्येकं भाषा आत्मस्थितान् सर्वान् शब्दान् आह्वयतु।'' अथ सर्वभाषाणां कोषगाता: शब्दा: तत्र सम्मिलिता: भवेयु: नैव अर्थहीना:। शब्दरूपं नाम भाषाया: शरीरम्: अर्थरूप: च आत्मा। यथा यत्र मन: रमते स: 'राम:'। य: अबोधत् स: 'बुद्ध:' चारु: वाक् यस्य स: 'चार्वाक:' या सततम् अग्रे गच्छति सा 'गङ्गा' इत्यादय:''। अत्रान्तरे संस्कृतभाषायाम् अमरकोषादय: नैके कोषा: अपि तत्र सम्मिलिता:। तेषु शब्दानां पर्यायशब्दा: नाम समानार्थकशब्दा: उपलब्धा:। सरस्वती पुनरवदत्, ''पर्यायशब्दानां मूलार्था: अपि चिन्तनीया:, यथा 'वृक्ष:' इति शब्दस्य विविधा: पर्यायशब्दा: सन्ति। पादप:–पादै: पिबति इति। महीरुह:–मह्या: रोहति इति। शाखी–शाखा: धारयति इति। इत्थं वृक्षस्य विविधानि लक्षणानि पर्यायशब्दा: प्रकटयन्ति। शब्दा: तु शक्तिस्वरूपा: अत: पर्यायशब्दानां यथोचित: उपयोग: करणीय:।''

सर्वा: भाषा: ऊचु:, ''अस्मदीया: खलु एते शब्दा:।'' विहस्य देवी उवाच, ''आम्, भवतीषु सर्वासु भाषासु समानसूत्रं अग्र वर्तते। तत् किमिति अन्वेष्टव्यम्।'' सर्वा [redacted]

शब्दज्ञानम् (३ तः २)

१. विशेषण-विशेष्याणां मेलनं कुरुत।

	अ	आ
१.	शब्दाः	भारतीयभाषाः
२.	सर्वाः	कोषाः।
		अर्थपूर्णाः

२. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत।
शब्दस्य विविधाः पर्यायशब्दाः सन्ति। (एतद्)

३. विरुद्धार्थिशब्दौ लिखत। श्रेष्ठा, अर्थपूर्णाः

अथवा

पृथक् करणम्।

कोष्ठकं पूरयत।

१. यत्र मनः रमते सः	
२. यः अबोधत् सः	
३. चारुः वाक् यस्य सः	
४. या सततम् अग्रे गच्छति सा	

प्र.३ ब माध्यमभाषया वाक्यं ससन्दर्भं स्पष्टीकुरुत। (२ तः १)

१. निर्वचनस्य पञ्च विधाः सन्ति।

२. ऋतुम् अनुसृत्य प्रसाधनं करणीयम् ।

चतुर्थः विभागः – नाट्यकलशः । (१३)

प्र.४ अ) नाट्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत ।
अवबोधनम् – (३ तः २)

१. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत।
१) घटोत्कचस्य स्वरः – __________ ।
अ) राक्षसीस्वरेण सदृशः।
ब) धनञ्जयस्वरेण सदृशः।

२. उचितं शब्दं चित्वा चतुष्कोणं पूरयत।
बालशौण्डीर्यं दृष्ट्वा भीमेन स्मर्यते – [ ]

३. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।
१) गुरुशुश्रूषुः खल्वयं तपस्वी।

घटोत्कच	:	भो मध्यम, मध्यम। शीघ्रमागच्छ। (ततः प्रविशति भीमसेनः ।)
भीम	:	(आत्मगतम्) अयि, कस्यायं स्वरः । कस्यचित् लोकवीरस्य भवेत्। बहुसदृशो हि अयं धनञ्जयस्वरेण। (विलोक्य) अहो, दर्शनीयोऽयं पुरुषः। सुव्यक्तं राक्षसीजः कस्यचित् पुत्रः। बन्धुरिव मे प्रतिभाति। अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः। भवतु, निग्रहीष्यामि तावदेनम्। (प्रकशाम्) भोः पुरुष! किमर्थं सज्जनमपराध्यसि। मुच्यतां मुच्यताम्।
घटोत्कच	:	न मुच्यते।
भीम	:	(आत्मगतम्) भोः कस्य पुत्रेणानेन भवितव्यम्? भ्रातृणां मम सर्वेषा कोऽयं गुणतस्करः? एतद् बालशौण्डीर्यं दृष्ट्वा अहं सौमद्रं स्मरामि। (प्रकाशं) भोः पुरुषः मुच्यताताम्। मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता। न मुच्यते तथाप्येषा गृहीतो मातुराज्ञया।
भीम	:	(आत्मगतम्) कथं मातुराज्ञेति। अहो गुरुशुश्रुषः खल्वयं तपस्वी। माता किल मनुष्याणां देवतानां च दैवतम्। (प्रकाशम्) पुरुष! प्रष्टव्यं खलु तावदस्ति।
घटोत्कच	:	ब्रूहि ब्रूहि, शीघ्रम्।
भीम	:	का नाम भवतो माता।
घटोत्कच	:	श्रूयतां, हिडिम्बा नाम राक्षसी।
भीम	:	(सहर्षमात्मगतम्) एवं हिडिम्बायाः पुत्रोऽयम्। सदृशः अन्य गर्वः। अस्य रूपं सत्वं बलं चैव। पाण्डवैः सदृशम्। (प्रकाशम्) भोः पुरुष! मुच्यताम्।
घटोत्कच	:	न मुच्यते।
भीम	:	(ब्राह्मणमुद्दिश्य) भो ब्राह्मण। गृह्यतां तव पुत्रः। वयमेनमनुगमिष्यामः।

शब्दज्ञानम् (३ तः २)

१. पूर्वकालवाचक-धातुसाधित-अव्यये परिच्छेदात् चित्वा लिखत।

२. विरुद्धार्थिशब्दौ लिखत। आत्मगतम्, शीघ्रम्

१. सन्धिविग्रहः कुरुत।

ब्राह्मणमुद्दिश्य - ________ + ________।

प्र. ४ ब गद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत ।

(०४)

अवबोधनम् (३ तः २)

(०२)

१. उचितं वाक्यांशं चित्वा वाक्यानि पुनर्लिखत ।

सीता कुशलवौ सन्दिष्टवती – .... ।

अ) महाराजं केवलं कुशलं परिप्रष्टव्यम् ।

ब) महाराजं प्रणम्य कुशलं च परिप्रष्टव्यम्

२. वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत ।

कुशलवौ नाट्यकलायां प्रवीणौ ।

३. उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

तापसकुमारौ – [ ]

विदूषकः : वयस्य, कलादर्शनायागतौ द्वौ तापसकुमारौ कुशलवौ इति । तौ किल भगवतो वाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञाने ।

रामः : वर्धते मे कुतूहलम् । तत्प्रवेशयाविलम्बितम् । (ततः प्रविशतः तापसौ कुशलवौ ।)

कुशः : (अपवार्य) वत्स लव! इदानीं भगवतो वाल्मीकेरादेशात् अम्बामभिवाद्य प्रस्थिते मयि, त्वं पर्णशालायां किमुपदिष्टः अम्बया?

लवः : सा सन्दिष्टवती, "वत्स! युवाभ्यां स्वाभाविकमवलेपं परित्यज्य, महाराजं प्रणम्य, कुशलं च परिप्रष्टव्यम्" इति ।

कुशः : युज्यते कुशलप्रश्नः, प्रणामस्तु कथम्?

लवः : कथम् न?

कुशः : अप्रणन्तारः किल अस्मद्विधाः तापसाः ।

लवः : क एवमाह?

कुशः : अम्बा ।

लवः : प्रणाममपि सा एव उपदिष्टवती । न च गुरुनियोगा विचारमर्हन्ति ।

कुशः : साधयामस्तावत् । अग्रतस्तत्र यत्कालोचितमनुष्ठास्यावः ।

(परिक्रामतः)

शब्दज्ञानम् । (३ तः २) (०२)

१. पूर्वकालवाचक-धातुसाधित-अव्यये पद्यांशतः चित्वा लिखत ।

२. सन्धिविग्रहं कुरुत – साधयामस्तावत् – ----------- + ---------
।

३. विरुद्धार्थकशब्दं परिच्छेदतः चित्वा लिखत ।

क्षीयते x ----------- , स्वीकृत्य x------------

प्र.क्र.४ क माध्यमभाषया वाक्यं ससन्दर्भं स्पष्टीकुरुत । (२ तः १) (०५)

१) न च गुरुनियोगा विचारमर्हन्ति ।

अथवा
२) अनार्यः परदारव्यवहारः ।

पञ्चमः विभागः – भारतीयविद्या

प्र. ५ उचितं विकल्पं चित्वा वाक्यं पूर्णं लिखत । (१० तः ८) (०८)

१. नाट्येतराः सर्वे साहित्यप्रकाराः केवलं ----------- भवन्ति ।
(श्राव्याः, मनोरञ्जकाः , दृश्याः)

२. ऋग्वेदे ---------- सन्ति ।
(संवादसूक्तानि, चित्रसूक्तानि, नृत्यसूक्तानि)

३. ------------ नर्तकाः वर्णिताः ।
(रामायणमहाभारतयोः, शिक्षाग्रन्थेषु, भारतविद्यासु)

४. अभिनयस्य ----------- प्रकाराः भरतेन स्पष्टीकृताः ।
(चत्वारः, त्रयः, पञ्च)

५. 'मृच्छकटिकम्' रूपकस्य --------- इति प्रकारः ।
(व्यायोगः, प्रकरणम्, प्रहसनम्)

६. काव्येषु नाटकं रम्यं तत्र रम्या ---------।
(शकुन्तला, रत्नावली, कुन्दमाला)

७. ---------- नाम भाणः लोके प्रसिध्दः ।
(कर्पूरचरितम्, रामचरितम्, महावीरचरितम्)

८. प्रथमे शतके --------------- सारिपुत्तप्रकरणं रचितम् ।
(अश्वघोषेण, कालिदासेन, भासेन)

९. 'नाटकं नाम कान्तः चाक्षुषः क्रतुः" इति ---------- वर्णयति ।
(कालिदासः, भासः, माघ)

१०. अधोनिर्दिष्टेषु दृश्यं काव्यम् ---------- ।
(कथा, नाट्यम्, महाकाव्यम्)

षष्ठः विभागः – लेखनकौशलम् ।

प्र. ६ अ मञ्जूषातः उचितशब्दान् चित्वा चित्रपटवर्णनस्य रिक्तस्थानानि पूरयत

(०८)

एतस्य चित्रपटस्य ------ भागौ वर्तेते । प्रथमभागे महिष्मती इति राजस्य प्रजाप्रियः राजा अस्ति ------------ । सः कटप्पाख्येन सेनापतिना ----------- हन्यते । वने जातः अमरेन्द्रपुत्रः महेन्द्रबाहुबाली ग्रामवासिदम्पतिभ्यां स्वपुत्रः इव ----------। युवावस्थां प्राप्तः ------------- अयं राजपुत्रः दैववशात् एव स्वस्य जन्मनः रहस्यं जानाति । स्वपितुः राज्यं क्रूरेभ्यः शत्रुभ्यः रक्षितुम् इच्छति । तस्य सफलतायाः कथांशः अस्य चित्रपटस्य -------------- भागः।

संस्कृतनामानि, ----------, संस्कृतवाक्यानि च एतस्य चित्रपटस्य वैशिष्ट्यम् । सङ्गीतमपि सुयोग्यं वर्तते । युद्धचित्रेण विविधशास्त्राणां तन्त्राणां च परिचयः भवति । चित्रपटस्य नेपथ्यं ----------- वर्तते । महती चतुरङ्गसेना गजाश्वपदातीनां सर्वमिदं प्राचीनभारतस्य ऐश्वर्यसमृद्धिं दर्शयति ।

(नेत्रदीपकं, द्वितीयः, कपटेन, अमरेन्द्रबाहुबाली, संस्कृतगीतं, गुणवान्, द्वौ, परिपाल्यते)

निमन्त्रणपत्रिका पठित्वा मार्गदर्शकप्रश्नाधारेण वृतान्तलेखनं कुरुत ।

संस्कृतदिनम् – १

निमन्त्रणम्

।। संस्कृतेन हि संस्कृतिः।।

सरोजिनी-विद्यालयः, मुरबाडग्रामः

आयोजित

संस्कृतदिननिमित्तेन

संस्कृतवृन्दसङ्गीतम्

(छात्राणां संस्कृत-गीत-नृत्य-प्रस्तुतीकरणम्)

प्रमुखातिथिः – कु विनी डिमेलो। (लोकप्रिया बालगायिका)

अध्यक्षः – प्रा. सिसिलिया लोबो। (प्राचार्य),

स्थलम् – त्रिवेणी सभागृहम्, मुरबाडग्रामः

समयः सायम् ५.०० तेः ८.०० । दि. १८ ऑगस्ट २०--

रसिकवराणाम् उपस्थितिः प्रार्थनीय।

संयोजकाः

नदीमः इब्राहीमः	**नीला गुर्जर**	**सलोनी खारकरः**
संस्कृतशिक्षकः	सङ्गीतशिक्षिका	छात्रप्रमुखा
nadim784@gmail.com	९६XXXXXX८५	८४XXXXXX७५

अथवा

अधोदत्तेषु एकं विषयम् अधिकृत्य संस्कृतभाषया ८ – १० वाक्येषु निबन्धलेखनं कुरुत।

१. परोपकारः।

२. मम प्रियः अभिनेता।

३. मित्रं प्रीतिरसायनम्।

सप्तमः विभागः – भाषाभ्यासः

प्र.७ अधोनिर्दिष्टा कृती: कुरुत। (५ त: ४)

अ. नाम-तालिकां पूरयत । (८ त: ६) (०३)

नाम	प्रातिपदिकम्	अन्तम्	लिङ्गम्	विभक्तिः	वचनम्
भर्ता	भर्तृ	ऋकारान्तम्	पुल्लिङगम्	------	------
सरस्वत्याः	सरस्वती	------	------	षष्ठी	एकवचनम्
तिथौ	------	इकारान्तम्	पुल्लिङगम्	------	एकवचनम्
द्विषताम्	------	तकारान्तम्	पुल्लिङगम्	------	बहुवचनम्

आ) समास -तालिकां पूरयत । (५ त: ३)

क्र.	समस्तपदम्	समासविग्रहः	समासनाम
१	------	न सन्तः	नञ् तत्पुरुषः
२	स्तुतिकन्या	------	कर्मधारयः
३	------	राक्षस्याः जायते इति	उपपद तत्पुरुषः
४	क्षीणायुः	क्षीणम् आयु. यस्य सः	------
५	लोकवीरः	लोकेषु वीरः	------
६	------	अर्थेन हीनः	तृतीया तत्पुरुषः
७	पञ्चवटीम्	------	द्विगुः
८	सदारः	दारैः सह	------

इ) तद्धित - कृदन्ततानां तलिकां पूरयत । (८ त: ६) (०३)

तद्धितम्	कृदन्तम्

(दारिद्र्यम्, भर्ता, वासः, सौभद्रः, भक्तिः, साहित्यम्, शक्तिः, भारतीयः)

ई) समानर्थकाशब्दं लिखत । (८ त: ६) (०३)

वस्त्रम्, सितः द्विषत्, तूलः, समुद्रः राक्षसीजः, महीरुहः, शक्तिधरः

उ) सूचनानुसारं परिवर्तनं कुरुत। (५ तः ३) (०३)

१. जनाः दोलोत्स्वं वितन्वते। (वाक्यं एकवचने परिवर्तय।)

२. अलं __________ । ('रोदन' इति पदस्य योग्यं विभक्ति लिखत।)

३. भीमः सौभद्रं स्मरति घटोत्कचं वदति च।
(पूर्वकालवाचकं योजयत।)

४. चिन्तनमग्नासु सर्वासु भाषासु सरस्वती वदति ।। (सति-सप्तमी रचनां निष्कासयत।)

५. यमेन अहं प्रेषितः। (वाच्यपरिवर्तनं कुरुत।)

अष्टमः विभागः - अपठितम् । (०४)

प्र. ८ संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरुत । (६ तः ४) (०४)

१. आलस्यः मनुजस्य महान् रिपुः ।

२. त्वं एतद् कार्यं कुरु ।

३. भरतनामकः नृपः आसीत् ।

४. बुद्धिमान् मनुष्यः स्वस्थानं न परित्यजेत् ।

५. तस्य शारदायै नमः ।

६. अपि जलं निर्मलम् ?

शुभं भवतु ।

64